संस्कृत-वार्ता:

14.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- भारतीयजनतापार्टीति-दलेन आगामि-लोकसभा-निर्वाचनाय संकल्प पत्र इति नाम्ना निजघोषणापत्रं प्रख्यापितम्। एतत् घोषणापत्रम् समान-नागरिक संहिता, एकं राष्ट्रं-एकं निर्वाचनम्, एकल मतदातृ सूची च एतान्संकल्पान् प्रकटयति।
- डॉ. बी.आर. अंबेडकरस्य जयन्त्यवसरे अद्य राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमंत्री च संसद् परिसरे तस्मै पुष्पाञ्जलयः समर्पितवन्तः।
- विदेशमन्त्रालयेन् इस्राइल-ईरान-देशयोर्मध्ये संवर्धमाने पारस्परिक-विद्वेषे अभिशङ्का अभिव्यक्ता।
- जम्मूकश्मीरे भीषण-हिमपातानन्तरं मुगलपथं पिहितं जातम्।
- रक्षानुसन्धान-विकास-संघटनेन भारतीयसैन्यबलेन च स्वदेशे निर्मितस्य टैंक-रोधि गाइडेड-प्रक्षेपास्त्रस्य साफल्येन परीक्षणं कृतम्।

<u>बीजेपी मेनिफेस्टो</u>

भारतीय जनता पार्टीति दलेन आगामि लोकसभा निर्वाचनाय संकल्प पत्र इति नाम्ना निजघोषणापत्रम् प्रख्यापितम्। एतत् घोषणा पत्रम् समान-नागरिक संहिता, एकं राष्ट्रं-एकं निर्वाचनम्, एकल मतदाता सूची च एतेषां प्रकटयति। अस्मिन् अवसरे प्रधानमंत्री नरेन्द्रमोदी, भाजपेतिदलाध्यक्ष: जे.पी. नड्डा, वरिष्ठनेता राजनाथसिंह: गृहमंत्री अमितशाह:, वित्तमंत्री निर्मला सीतारमणं समेत्य अन्ये च वरिष्ठ नेतार: उपस्थिता: आसन्। अवसरेऽस्मिन् श्रीमोदी प्रोक्तवान् यत् एतत् संकल्पपत्रम् युवान:, महिला:, कृषकान् निर्धनान् च सशक्तं करोति, यतोहि एते विकसित-राष्ट्रस्य चत्वार: स्तम्भा: सन्ति। श्रीमोदी अवदत् यत् संकल्पपत्रमेतत् जीवनस्य गरिम्नि गुणवत्तायां च आधारितोऽस्ति। श्रीमोदी प्रोक्तवान् यत् भाजपाइति दलेन वरिष्ठ नागरिकान्, किन्नर समुदायस्यजनान् च आयुष्मान् भारत योजनाया: अन्तर्गतं आनेतुं निर्णया: विहिता:। अस्मिन् संकल्पपत्रे भाजपाइति दलेन प्रधानमंत्री-गरीब-कल्याण-अन्न-योजनाया: अन्तर्गतं नि:शुल्कं खाद्यान्नं प्रदातुं अग्रिम-पञ्चवर्षाणि यावत् प्रवर्तयितुं प्रतिपादितम्। तिस्र: कोटि-महिला: लखपति दीदी इति भवेयु: एवं संकल्पपत्रे प्रतिपादितम्। सममेव प्रधानमंत्री सूर्यगृह-भोजनान्तर्गतं वैद्युतकीय-प्रपत्रं शून्यीकर्तुं इति संकल्पपत्रे प्रतिपादितम्।

डॉ. बीआर अंबेडकर

डॉ. बीआर अंबेडकरस्य जयन्त्यवसरे अद्य राष्ट्रपतिः द्रौपदी मुर्मू, उपराष्ट्रपतिः जगदीपधनखड़ः, प्रधानमंत्री नरेंद्रमोदी च संसद् परिसरे तस्मै पुष्पाञ्जलयः समर्पितवन्तः। सममेव देशवासिनां कृते शुभकामनाश्चापि प्रदत्तवन्तः। राष्ट्रपतिः एकस्मिन् ट्वीटसन्देशे प्रोक्तवती यत् - सामाजिक-परिवर्तनस्य अग्रदूतेन, बहुमुखी-प्रतिभायुक्तेन बाबासाहेब अंबेडकरेण न्यायविद्रूपेण, शिक्षाविद्रूपेण, अर्थशास्त्रित्वेन, समाज-सुधारकत्वेन, राजनीतिक-नेतारूपेण च देशस्य कृते असाधारणं योगदानं प्रदत्तं। श्री धनखड़ेन डॉ. अंबेडकरद्वारा स्थापितानां आदर्शानां परिपालनाय अपि च तस्य न्यायपूर्ण समाजस्य दृष्टिकोणं साकारयितुं कार्यं कर्तुं च जनैः समाह्वानं विहितम्। प्रधानमंत्री प्रोक्तवान् यत् डॉ. अंबेडकरस्य दृष्टिकोणमालक्ष्य अद्यतन नवभारतस्य द्युति: पूर्णरीत्या भिन्नास्ति।

डीआरडीओ

रक्षानुसन्धान-विकास संघटनेन भारतीयसैन्यबलेन च स्वदेशे निर्मितस्य टैंक-गाइडेड-प्रक्षेपास्त्रस्य साफल्येन परीक्षणं कृतम्। परीक्षणमिदं राजस्थानस्य पोखरणे ह्य: जातम्। अस्य प्रक्षेपास्त्रस्य उपयोग: अहर्निशं कर्तुं शक्यते। एतस्मिन् प्रक्षेपास्त्रे आधुनिक-योद्धृ-टैंकवाहनस्य ध्वंसनस्य क्षमतापि विद्यते। रक्षामन्त्री राजनाथसिंह: सफल-परीक्षणानन्तरं संघटनाय भारतीय-सेनायै च वर्धापनानि प्रदत्तवान्। असौ प्रक्षेपास्त्रमिदं उन्नत-प्रौद्यौगिकीय-आधारित-रक्षा-प्रणाल्या: विकासे महत्वपूर्णपदक्षेप: कथितवान्।

कांग्रेसदलप्रत्याशिन:

कांग्रेसदलेन लोकसभा-निर्वाचनाय इतोऽपि षोडश-प्रत्याशीनाम् अन्या सूची प्रकाशिता। कांग्रेसदलस्य सांसद: मनीषतिवारी चण्डीगढ-लोकसभासनाय स्पर्धिष्यते। हिमाचलप्रदेशस्य मन्त्री विक्रमादित्य-सिंह: मण्डी-लोकसभासने भाजपेतिदलस्य प्रत्याशिनं कंगनारनौत इत्येतां विरूद्धं अवतारित:। पूर्व-केन्द्रीयमन्त्री श्रीकान्त-जेना: ओडिशाया: बालेश्वर-क्षेत्रात् प्रत्याशी भविष्यति। अनेन दलेन गुजरातराज्ये विधानसभाया: उप-निर्वाचनाय चतुर्णां प्रत्याशिनां नामानि अपि प्रख्यापितानि।

## पीएम-पिपारीया एमपी

प्रधानमंत्री श्री नरेन्द्रमोदी प्रोक्तवान् यत्-एतत् संकल्पपत्रम् युवभ्य:, महिलाभ्य: कृषकेभ्य:, निर्धनेभ्य: च समर्पितम् अस्ति। असौ प्रोक्तवान् यत् सामाजिकरूपेण, भौतिकरूपेण च सुदृढ-विस्तार: भाजपेतिदलस्य सर्वोच्च-प्राथमिकता अस्ति। मध्यप्रदेशस्य नर्मदापुरम्-जनपदे एकां जनसभां सम्बोधयन् श्री मोदी प्रोक्तवान् यत् भाजपा इतिदलेन आधुनिक-भारते बाबा-अम्बेडकरस्य योगदानाय नवीनाभिज्ञानं प्रदत्तम् अस्ति। जना: निज-दूरभाषयन्त्रेण यत्किमपि वित्तस्य आदान-प्रदानं कुर्वन्ति तस्य नाम भीम यू.पी. आई. इति वर्तते। य: बाबा अम्बेडकरस्य नामाधारितोऽस्ति, श्री मोदी अवदत् यत् एतत् बाबा साहेबस्य संविधानमेवास्ति येन आदिवासि-परिवारस्य पुत्री भारत-देशस्य राष्ट्रपति पदं अलङ्करोति। असौ प्रोक्तवान् यत् भारतप्रशासनेन भगवान् बिरसा मुंडा इत्यस्य जयन्ती आदिवासी गौरव दिवसत्वेन घोषितमस्ति।

## प्रधानमन्त्री-स्थिरप्रशासनम्

प्रधानमन्त्री नरेन्द्रमोदी विश्वस्मिन् विश्वे व्यावृत्त-अनिश्चितता-विद्वेषयो: अन्तर्गतं राष्ट्रे एकस्य सुदृढ-स्थिर-प्रशासनस्य आवश्यकतायो बलं प्रदत्तवान्। भाजपेति दलस्य संकल्पपत्र-विमोचनावधौ स्वीयोद् बोधने प्रधानमन्त्री प्रोक्तवान् यत् संकटस्य एतादृशे समये एतेषु क्षेत्रेषु निवसन्तानां भारतीयानां सुरक्षा तस्य प्रशासनस्य प्राथमिकतास्ति। तेनोक्तं यत् एतादृशे साम्प्रतिके समये भारते पूर्ण-बहुमत-प्राप्तस्य प्रशासनस्य महत्ता इतोपि अधिका जाता।

## जम्मू-कश्मीर

जम्मू कश्मीरे भीषण हिमवर्षणानन्तरं जम्मू संभागस्य सीमवर्ती जनपदयो: राजौरी, पूँछ क्षेत्रे कश्मीरोपत्यकाया: शोपियाँ जनपदेन योजयिष्यमाणं मुगलपथं अग्रिमां सूचनां यावत् वाहनानां यातायाताय पिहितमस्ति। प्रतिकूल-वातावरणं आलक्ष्य मार्ग: पिहित: कृत:।

## जम्मूकश्मीर-मतदातार:

जम्मूकश्मीरराज्ये पर्वतीय डोडा जनपदं शताधिकवर्षाणां षड्त्रिंशदधिकानां मतदातृणां स्वागतं कुर्वद् ऐतिह्यविरचने स्थाने अस्ति। एतस्मिन् जनपदे सप्तत्रिंशत् मतदातार: एतादृशा: सन्ति ये शताधिकानां वर्षाणां वयोवृद्धा: सन्ति। जनपद-निर्वाचन-अधिकारी एतादृशेभ्य: जनेभ्य: विशिष्ट-व्यवस्थां कृतवान् एते जना: मतदानार्थं वाह्य-पल्यङ्के आगमिष्यन्ति।

ईरान-विदेशमन्त्रालय:

विदेशमन्त्रालयेन् इस्राइल-ईरान देशयोर्मध्ये संवर्धमाने पारस्परिक-विद्वेषे अभिशङ्का अभिव्यक्ता। मन्त्रालयेन निगदितं यत् भारतं इस्राइल-ईरानदेशयोर्मध्ये प्रतिकूल-स्थितिं प्रति गभीररूपेण व्याकुलमस्ति। अनेन क्षेत्रे शान्ति: सुरक्षा च सङ्कटे स्त:। भारतेन उभाभ्यां देशाभ्यां हिंसां दूरीकर्तुं कूटनीतिपथि प्रत्यागमनाय च प्रार्थित:। अवधेयं वर्तते यत् ईरानदेशेन इस्राइलदेशे ड्रोन-बैलिस्टिक-क्रूज-इत्यादिभि: प्रक्षेपास्त्रै: आक्रमणं कृतम्। संपूर्णे इस्राइलदेशे प्रात: कालादेव वायवीयसंचेतनायन्त्रं गुंजायमानमस्ति।

मल्लयुद्ध:-एशियाई

भारतीय-मल्लस्पर्धा-क्रीडिका राधिका शनिवासरे किर्गिस्तानस्य बिश्केक-नगरे एशियाई-मल्ल-चैम्पियनशिप-प्रतिस्पर्धायां महिलानाम् अष्टषष्टि किलोग्राममितस्य वर्गे रजतपदकं विजितवती। अपरा क्रीडिका शिवानीपवार: महिलानां पञ्चाशत्-किलोग्राममिते वर्गे कांस्यपदकं स्वीकृतवती। राधिका इत्येषा कजाकिस्तानस्य अल्बिना-कैरगेल्डिनोवा इत्येतां द्वादश-द्वे अंकै: पराजितवती।

।। इति वार्ता: ।।